राजनि० एतेषां कठिनवीजकत्वात्तथात्वम् ४कठिनवीजयुक्ते त्रि० कर्म० । ५कठिने वीजे न० ।

**दृढव्य** पु० ऋषिभेदे "दृढव्यश्चोर्द्ध्वबाहुश्च तृणसोमाङ्गिरास्तथा" भा०अनु० १५०अ० ।

**दृढव्रत** त्रि० दृढं प्रतिपक्षैश्चालयितुमशक्यं व्रतमस्य । १अन्तरायैरचाल्यसङ्कल्पके फलपर्यन्तं प्रारब्धकर्मात्यागशीले भगवानेव भजनीयः स च एवंरूप एवेत्यत्राप्रामाण्यशङ्काशून्यसंकल्पके २विदुषि च । तत्र प्रथमार्थे "एवं दृढव्रतोनित्यं ब्रह्मचारी समाहितः" मनुः द्वितीयार्थे "अहिंसानिरतो यश्च सत्यवादी दृढव्रतः" भा०व० ६८१०श्लो० ३स्थिरसङ्कल्पयुक्ते च "स्थेयान् निगूढमानोधीरोदात्तो दृढव्रतः कथितः" सा०द० ।

**दृढसन्ध** त्रि० दृढा सन्धाऽस्य । १स्थिरसन्धाने २धृतराष्ट्रपुत्रभेदे पु० "जरासन्धो दृढसन्धः सत्यसन्धः सहस्रवाक्" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

**दृढसन्धि** त्रि० दृढः सन्धिः सन्धानं यस्य । निश्छिद्रतया संहते अमरः । [मूर्वालतायाम् शब्दच० ।

**दृढसूत्रिका** स्त्री दृढं सूत्रं यस्याः कप् अत इत्त्वम् ।

**दृढसेन** पु० कलियुगीये जनमेजयवंश्ये नृपभेदे "क्षेमोऽथ सुव्रतस्तस्माद्धर्मस्तत्र समन्ततः । दृढसेनोऽथ सुमतिः सुबलो जनिता ततः" भाग० ९।२२।३० जनमेजयं प्रति तद्वंश्यभविष्यन्नृपोक्तौ ।

**दृढस्कन्ध** पु० दृढः स्कन्धोऽस्य । क्षीरिद्रुमे जटाधरः ।

**दृढस्यु** पु० अगस्त्यर्षेर्लोपामुद्रागर्भजाते इध्मवाहापरनामके ऋषिभेदे इध्मवाहशब्दे ९२८पृ०दृश्यम् ।

**दृढहनु** पु० आजमीढवंश्ये नृपभेदे "आजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः । बृहत्कायस्ततस्तस्य पुत्रश्चासीज्जयद्रथः । तत्सुतोविशदस्तस्य सेनजित् समजायत । रुचिराश्वो दृढहनुः काश्योवत्सश्च तत्सुताः" भाग० ५।२१।१७।

**दृढहस्त** पु० दृढः हस्तः हस्तव्यापारोऽस्य । १खड्गादिधारणे दृढहस्तके योधे २धृतराष्ट्रपुत्रभेदे पु० "दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ" भा०आ० ६७अ०तत्पुत्रोक्तौ

**दृढाक्ष** पु० राजभेदे "एकलव्यो दृढाक्षश्च क्षत्रधर्मा जयद्रथः" हरिवं० ९९अ०।

**दृढाङ्ग** त्रि०दृढमङ्गमस्य । १कठिनाङ्गयुक्ते २हीरके न०राजनि० तस्यावयवस्य इतरापेक्षयाऽतीव कठिनत्वात्तथात्वम् ।

**दृढादि** पु० "वर्णदृढादिभ्यः ष्यञ् च" पा०"चात् इमनिच्" सि०कौ० उक्ते भावे ष्यञ्इमनिचोर्निमित्ते शब्दगणे स च गणः "दृढ़ वृढ़ परिवृढ़ भृश कृश वक्र शुक्र चुक्र आम्र कृष्ण लवण ताम्र शीत उष्ण जड़ वधिर पण्डित मधुर मूर्ख मूक (वेर्यातलाभमतिमनःशारदानाम्) (समो मतिमनसोः) जवन" दृढ़ादिः । गुणवचनत्वादेव सिद्धे इमनिजर्थं वचनम् ।

**दृढायु** पु० तृतीयमनोः सावर्णस्य पुत्रभेदे "संवर्त्तगः सुशर्मा च देवानीकः पुरूवहः । क्षेमधन्वा दृढायुश्च आदर्शः पण्डको मनुः । सावर्णस्य तु पुत्रा वै तृतीयस्य नव स्मृताः" हरिवं० ७अ०। उर्वशीगर्भजाते ऐलनृपपुत्रभेदे च "षट् सुता जज्ञिरे चैलादायुर्धीमानमावसुः । दृढ़ायुश्च वनायुश्च शतायुश्चोर्वशीसुताः" भा०आ० ७४अ०

**दृढायुध** पु० दृढ़मायुधं तद्व्यापारोऽस्य । दृढायुधव्यापारके "दृढ़ायुधौ ध्रुवपातौ युद्धे च कृतनिश्चयौ" (नकुलसहदेवौ) भा०व० ५१अ० । २धृतराष्ट्रपुत्रभेदे पु० "उग्रायुधो भीमशरः कनकायुर्दृढ़ायुधः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

**दृढाश्व** पु० धुन्धुमारनृपपुत्रभेदे "धौन्धुमारिर्दृढ़ाश्वश्च हर्यश्वस्तस्य चात्मजः" हरिवं० १२अ०।

**दृढेयु** पु० ऋषिभेदे "दृढेयुश्च ऋतेयुश्च परिव्याधश्च कीर्तिमान् । एकतश्च द्वितश्चैव त्रितश्चैवादित्यसन्निभाः" भा० अनु० १५०अ० ।

**दृढेषुधि** पु० दृढ़ं बद्ध इषुधिर्येन । दृढ़तया बद्धतूणके १योधे २राजभेदे "अविच्छिन्नपलोवृत्तः कृतबन्धुर्दृढेषुधिः" भा० आ० १अ० ।

**दृत** त्रि० दृ+क्त १आदरयुक्ते आदृतः दॄ—विदारे क्त वा० ह्रस्वः । २विदीर्णे "दृते दृंह मामित्रस्य" यजु० ३६।१८"दृते दॄ विदारे विदीर्णे जराजर्जरितेऽपि शरीरे" वेददी० ३जीरके स्त्री शब्दच० ।

**दृति** स्त्री दॄ—विदारे ति कित् ह्रस्वश्च । १चर्ममयपात्रे २मत्स्ये च मेदि०। "इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम्" मनुः "कपाले यद्वदापः स्युः श्वदृतौ च यथा पयः । आश्रयस्थानदोषेण वृत्तहीने तथा श्रुतम्"भा०शा०१२२४ श्लो०। दृतौ भवः ढञ् दार्तेय दृतिभवे स्त्रियां ङीप् । मत्स्ये "मांसाद्दशगुणा दृतिः" उज्ज्वलद०धृतवाक्यम् । ३रोमश चर्मणि ४गलकम्बले च "सवत्सां पीवरीं दत्त्वा दृतिकण्ठामलङ्कृताम्" भा०अनु० ७९अ०। "दृतिकण्ठां